अ.नं ३

मनुस्मृति

३०२८ स्मृ : ११

नं. ३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

मनुस्मृति -

(1)

श्रीकाशीविश्वनाथपुरीमेंढुंढराजगणेशकेसमीपदाऊअग्निहोत्रीकेसिद्धविनायकयंत्र
मेंवीसौस्मृतछापीगईलिखारामस्वरूपनेछापापरवरीछापनेवालेनेजिसेलेनाहोयउसेढुंढरा
जगणेशपरदाऊअग्निहोत्रीकेदुकानपरमिलेगी ॥ ॥ ॥ ॥

म॰ श्रीगणेशायनमः ॥ मनुमेकाग्रमासीनमभिगम्यमहर्षयः प्रतिपूज्ययथान्यायमिदंवचनमब्रुवन् १ भगवन्सर्ववर्णा स्मृ॰
(2) १ नांयथावदनुपूर्वशः अन्तरप्रभवानांचधर्मान्नोवक्तुमर्हसि २ त्वमेकोह्यस्यसर्वस्यविधानस्यस्वयंभुवः अचिन्त्य
स्याऽप्रमेयस्यकार्य्यतत्त्वार्थवित्प्रभो ३ सतैःपृष्टस्तथासम्यगमितौजामहात्मभिः प्रत्युवाचार्च्यतान्सर्वान्महर्षीन् श्रूय
तामिति ४ आसीदिदंतमोभूतमऽप्रज्ञातमऽलक्षणम् अप्रतर्क्यमविज्ञेयंप्रसुप्तमिवसर्वतः ५ ततःस्वयंभूर्भगवा
नव्यक्तोव्यंजयन्निदम् महाभूतादिवृत्तौजाःप्रादुरासीत्तमोनुदः ६ योऽसावतीन्द्रियग्राह्यःसूक्ष्मोऽव्यक्तःसनातनः सर्व
भूतमयोऽचिन्त्यःसएवस्वयमुद्बभौ ७ सोऽभिध्यायशरीरात्स्वात्सिसृक्षुर्विविधाःप्रजाः अपएवससर्जादौतासुवीजम
वासृजत् ८ तदण्डमभवद्धैमंसहस्रांशुसमप्रभम् तस्मिन्जज्ञेस्वयंब्रह्मासर्वलोकपितामहः ९ आपोनाराइतिप्रोक्ता
आपोवैनरसूनवः तायदस्यायनंपूर्वंतेननारायणःस्मृतः १० यत्तत्कारणमव्यक्तंनित्यंसदसदात्मकम् तद्विसृष्टःसपुरुषो
लोकेब्रह्मेतिकीर्त्यते ११ तस्मिन्नंडेसभगवानुषित्वापरिवत्सरम् स्वयमेवात्मनोध्यानात्तदंडमकरोद्द्विधा १२ ताभ्यांस
शकलाभ्यांचदिवंभूमिंचनिर्ममे मध्येव्योमदिशश्चाष्टावपांस्थानंचशाश्वतम् १३ उद्बवर्हात्मनश्चैवमनःसदसदात्मकम्
मनसश्चाप्यहंकारमभिमंतारमीश्वरम् १४ महान्तमेवचात्मानंसर्वाणित्रिगुणानिच विषयाणांग्रहीतॄणिशनैःपञ्चेन्द्रि राम
याणिच १५ तेषान्त्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसाम् सन्निवेश्यात्ममात्रासुसर्वभूतानिनिर्ममे १६ यन्मूर्त्य १

(2A)

वयवाः सूक्ष्मास्तस्येमान्याश्रयन्तिषट् तस्माच्छरीरमित्याहुस्तस्यमूर्त्तिम्मनीषिणः १७ तदाविशन्तिभूतानिमहान्तिसह
कर्म्मभिः मनश्चावयवैः सूक्ष्मैस्सर्वभूतकृदव्ययम् १८ तेषामिदन्तुसप्तानांपुरुषाणांमहौजसाम् सूक्ष्माभ्योमूर्त्तिमात्रा
भ्यः सम्भवत्यव्ययाद्व्ययम् १९ आद्याद्यस्यगुणन्त्वेषामवाप्नोतिपरःपरः योयोयावतिथश्चैषांससतावद्गुणःस्मृतः २०
सर्वेषान्तुसनामानिकर्म्माणिचपृथक्पृथक् वेदशब्देभ्यएवादौपृथक्संस्थाश्चनिर्ममे २१ कर्म्मात्मनाञ्चदेवानांसो
ऽसृजत्प्राणिनांप्रभुः साध्यानांचगणंसूक्ष्मंयज्ञंचैवसनातनम् २२ अग्निवायुरविभ्यस्तुत्रयम्ब्रह्मसनातनम् दुदो
हयज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् २३ कालंकालविभक्तीश्चनक्षत्राणिग्रहांस्तथा सरितस्सागराञ्छैलान्स
मानिविषमाणिच २४ तपोवाचंरतिञ्चैवकामञ्चक्रोधमेवच सृष्टिंससर्जचैवेमांस्रष्टुमिच्छन्निमाःप्रजाः २५ कर्म्म
णाञ्चविवेकार्थंधर्म्माधर्म्मौव्यवेचयत् द्वन्द्वैरयोजयच्चेमाःसुखदुःखादिभिःप्रजाः २६ अण्व्योमात्राविनाशिन्योदशा
र्द्धानांतुयाःस्मृताः ताभिस्सार्द्धमिदंसर्वंसम्भवत्यनुपूर्वशः २७ यन्तुकर्म्मणियस्मिन्सन्ययुंक्तप्रथमंप्रभुः सतदेवस्वयं
भेजेसृज्यमानःपुनःपुनः २८ हिंस्राहिंस्रेमृदुक्रूरेधर्म्माधर्म्मावृतानृते यद्यस्यसोदधात्सर्गेतत्तस्यस्वयमाविशत् २९
यथर्त्तुलिंगान्यृतवःस्वयमेवर्त्तुपर्यये स्वानिस्वान्यभिपद्यन्तेतथाकर्म्माणिदेहिनः ३० लोकानान्तुविवृद्ध्यर्थंमुखबाहूरुपादतः
ब्राह्मणंक्षत्रियंवैश्यंशूद्रञ्चनिरवर्त्तयत् ३१ द्विधाकृत्वात्मनोदेहमर्द्धेनपुरुषोऽभवत् अर्द्धेननारीतस्यांसविराटमसृजत्प्रभुः

(3)

म० ३२ तपस्तप्त्वाऽसृजद्यन्तुसस्वयंपुरुषोविराट् तंमांवित्तास्यसर्वस्यस्रष्टारंद्विजसत्तमाः ३३ अहंप्रजाःसिसृक्षुस्तुतपस्तप्त्वासुदुश्च स्मृतिः
२ रम् पतीन्प्रजानामसृजंमहर्षीनादितोदश ३४ मरीचिमत्र्यङ्गिरसौपुलस्त्यंपुलहंक्रतुम् प्रचेतसंवशिष्ठंचभृगुंनारदमेवच ३५
देवान्देवनिकायांश्चमहर्षींश्चामितौजसः ३६ यक्षरक्षःपिशाचांश्चगंधर्वाप्सरसोसुरान् नागान्सर्पान्सुपर्णांश्चपितॄणांश्च पृ
थग्गणान् ३७ विद्युतोऽशनिमेघांश्चरोहितेन्द्रधनूंषिच उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानिच ३८ किन्नरान्वानरा
न्मत्स्यान्विविधांश्चविहंगमान् पशून्मृगान्मनुष्यांश्चव्यालांश्चोभयतोदतः ३९ कृमिकीटपतंगांश्च यूकामक्षिकमत्कु
णम् सर्वंचदंशमशकंस्थावरंचपृथग्विधम् ४० एवमेतैरिदंसर्वंमन्नियोगान्महात्मभिः यथाकर्मतपोयोगात्सृष्टंस्था
वरजङ्गमम् ४१ येषान्तुयादृशंकर्म्मभूतानामिहकीर्तितम् तत्तथावोऽभिधास्यामिकर्म्मयोगंचजन्मनि ४२ पशवश्चमृगा
श्चैवव्यालाश्चोभयतोदतः रक्षांसिचपिशाचाश्चमनुष्याश्चजरायुजाः ४३ अण्डजाःपक्षिणःसर्पानक्रामत्स्याश्चकच्छपाः
यानिचैवंप्रकाराणिस्थालजान्यौदकानिच ४४ स्वेदजंदंशमशकंयूकामक्षिकमत्कुणम् ऊष्मणश्चोपजायंते यच्चान्यत्किं
चिदीदृशम् ४५ उद्भिज्जाःस्थावराःसर्वेबीजकाण्डप्ररोहिणः ओषध्यःफलपाकान्ताबहुपुष्पफलोपगाः ४६ अपुष्पाःफ
लवंतोयेतेवनस्पतयःस्मृताः पुष्पिणःफलिनश्चैववृक्षास्तूभयतःस्मृताः ४७ गुच्छगुल्मन्तुविविधंतथैवतृणजातयः बीज राम
काण्डरुहाण्येवप्रतानावल्यएवच ४८ तमसाबहुरूपेणवेष्टिताःकर्म्महेतुना अन्तःसंज्ञाभवन्त्येतेसुखदुःखसमन्विताः ४९ २

(3A)

एतदन्तास्तुगतयोब्रह्माद्याःसमुदाहृताः घोरेस्मिन्भूतसंसारेनित्यंसततयायिनि ५० एवंसर्वंससृष्ट्वेदंमांचाऽचिन्त्यपरा
क्रमः आत्मन्यंतर्दधेभूयःकालंकालेनपीडयन् ५१ यदासदेवोजागर्तितदेदंचेष्टतेजगत् यदास्वपितिशान्तात्मातदासर्वं
निमीलति ५२ तस्मिन्स्वपितितुस्वस्थेकर्म्मात्मानःशरीरिणः स्वकर्म्मभ्योनिवर्तन्तेमनश्चग्लानिमृच्छति ५३ युगपत्तुप्रली
यन्तेयदातस्मिन्महात्मनि तदायंसर्वभूतात्मासुखंस्वपितिनिर्वृतः ५४ तमोयन्तुसमाश्रित्यचिरन्तिष्ठतिसेन्द्रियः नच।
स्वंकुरुतेकर्म्मतदोत्क्रामतिमूर्तितः ५५ यदाणुमात्रिकोभूत्वाबीजंस्थास्नुचरिष्णुच समाविशतिसंसृष्टस्तदामूर्तिंविम
ञ्चति ५६ एवंसजाग्रत्स्वप्नाभ्यामिदंसर्वंचराचरम् संजीवयतिचाजस्रंप्रमापयतिचाव्ययः ५७ इदंशास्त्रंतुकृत्वासौ
मामेवस्वयमादितः विधिवद्ग्राहयामासमरीच्यादींस्त्वहंमुनीन् ५८ एतद्वोयंभृगुश्शास्त्रंश्रावयिष्यत्यशेषतः एत।
द्धिमत्तोधिजगेसर्वमेषोऽखिलंमुनिः ५९ ततस्तथासतेनोक्तोमहर्षिर्मनुनाभृगुः तानब्रवीदृषीन्सर्वान्प्रीतात्माश्रूयतामि
ति ६० स्वायम्भुवस्यास्यमनोःषड्वंश्यामनवोपरे सृष्टवन्तःप्रजाःस्वाःस्वामहात्मानोमहौजसः ६१ स्वारोचिषश्चोत्तमि॥।
श्चतामसोरैवतस्तथा चाक्षुषश्चमहातेजाविवस्वत्सुतएवच ६२ स्वायंभवाद्यास्सप्तैतेमनवोभूरितेजसः स्वेस्वेन्तरेसर्वमि
दमुत्पाद्यापुश्चराचरम् ६३ निमेषादशचाष्टौचकाष्ठात्रिंशत्तुताःकला त्रिंशत्कलामुहूर्तःस्यादहोरात्रन्तुतावतः ६४
अहोरात्रेविभजतेसूर्योमानुषदैविके रात्रिःस्वप्नायभूतानांचेष्टायैकर्म्मणामहः ६५ पित्र्येरात्र्यहनीमासःप्रविभागस्तुप

(५)

म० स्रयोः कर्म्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नायशर्वरी ६६ दैवेरात्र्यहनीवर्षं प्रविभागस्तयोः पुनः अहस्तत्रोदगयनं रात्रिः स्याद्द स्मृतिः
३ क्षिणायनम् ६७ ब्राह्मस्यतुक्षपाहस्य यत्प्रमाणं समासतः एकैकशो युगानान्तु क्रमशस्तन्निबोधत ६८ चत्वार्य्याहुः सह १
स्राणि वर्षाणां तु कृतं युगम् तस्य तावच्छती संध्या संध्यांशश्च तथाविधः ६९ इतरेषु च संध्येषु संसंध्यांशेषु च त्रिषु एका
पायेन वर्तन्ते सहस्राणि शतानि च ७० यदेतत्परिसंख्यातमादावेव चतुर्युगम् एतद्द्वादशसाहस्रन्देवानां युगमुच्यते ७१
दैविकानां युगानान्तु सहस्रं परिसंख्यया ब्राह्ममेकमहर्ज्ञेयन्तावतीं रात्रिरेव च ७२ तद्वै युगसहस्रान्तम्ब्राह्मं पुण्यमहर्वि
दुः रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जनाः ७३ तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुद्ध्यते प्रतिबुद्धश्च सृजति मनः स
दात्मकम् ७४ मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः ७५ आकाशात्तु
विकुर्वाणात्सर्वगंधवहः शुचिः बलवान् जायते वायुः स वै स्पर्शगुणो मतः ७६ वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदम्
ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते ७७ ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः अद्भ्यो गंधगुणा भूमिरित्येषा
सृष्टिरादितः ७८ यत्प्राग्द्वादशसाहस्रमुदितं दैविकं युगम् तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ७९ मन्वन्तराण्यसं
ख्यानि सृष्टिः संहार एव च क्रीडन्निवैतत्कुरुते परमेष्ठी पुनः पुनः ८० चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे नाधर्मे एम
णागमः कश्चिन्मनुष्यान्प्रतिवर्तते ८१ इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः चौरिकानृतमायाभिर्धर्मश्चापैति पादशः ८२ ३

Joint project of the Rajawade Sanshodhan Mandal, Phule and the Yashwantrao Chavan Pratishthan, Mumbai.

8A)

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ८३ वेदोक्तमायुर्मर्त्यानामाशिषश्चैव क
र्मणाम् फलंत्यनुयुगं लोके प्रभावश्च शरीरिणाम् ८४ अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे अन्ये कलियुगे नृणां युगह्रा
सानुरूपतः ८५ तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ८६ सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं
स महाद्युतिः मुखबाहूरुपज्जानां पृथक्कर्माण्यकल्पयत् ८७ अध्यापनमध्ययनं यजनं याजनं तथा दानं प्रतिग्रहं चैव ब्रा
ह्मणानामकल्पयत् ८८ प्रजानां रक्षणं दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः ८९ पशूनां र
क्षणं दानमिज्याध्ययनमेव च वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च ९० एकमेव तु शूद्रस्य प्रभुः कर्म समादिश
त् एतेषामेव वर्णानां शुश्रूषामनसूयया ९१ ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्व
यंभुवा ९२ उत्तमांगोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ९३ तं हि स्वयंभूः स्वा
दास्यात्तपस्तप्त्वादितोऽसृजत् हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ९४ यस्यास्येन सदाश्नंति हव्यानि त्रिदिवौकसः
कव्यानि चैव पितरः किंभूतमधिकं ततः ९५ भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्रा
ह्मणाः स्मृताः ९६ ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः ९७ उत्पत्तिरेव विप्रस्य
मूर्तिर्धर्मस्य शाश्वती सहि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ९८ ब्राह्मणो जायमानो हि पृथिव्यामधिजायते ईश्वरः

(5)

म० सर्वभूतानांधर्म्मकोशस्यगुप्तये ९९ सर्वंस्वंब्राह्मणस्येदं यत्किंचिज्जगतीगतम् श्रैष्ठ्येनाभिजनेनेदंसर्वंवैब्राह्मणोऽर्ह स्मृतिः
४ ति १०० स्वमेवब्राह्मणोभुङ्क्तेस्वंवस्तेस्वंददातिच आनृशंस्याद्ब्राह्मणस्यभुञ्जतेहीतरेजनाः १०१ तस्यकर्मविवे १
कार्थंशेषाणामनुपूर्वशः स्वायम्भुवोमनुर्धीमानिदंशास्त्रमकल्पयत् १०२ विदुषाब्राह्मणेनेदमध्येतव्यंप्रयत्नतः
शिष्येभ्यश्चप्रवक्तव्यंसम्यङ्नान्येनकेनचित् १०३ इदंशास्त्रमधीयानोब्राह्मणःशंसितव्रतः मनोवाग्देहजैर्नित्यंकर्म्मदो
षैर्नलिप्यते १०४ पुनातिपङ्क्तिंवंश्यांश्चसप्तसप्तपरावरान् पृथिवीमपिचैवेमांकृत्स्नामेकोपिसोऽर्हति १०५ इदंस्व
स्त्ययनंश्रेष्ठमिदंबुद्धिविवर्द्धनम् इदंयशस्यमायुष्यमिदंनिःश्रेयसंपरम् १०६ अस्मिन्धर्म्मोऽखिलेनोक्तोगुणदोषौ
चकर्म्मणाम् चतुर्णामपिवर्णानामाचारश्चैवशाश्वतः १०७ आचारःपरमोधर्म्मःश्रुत्युक्तःस्मार्तएवच तस्मादस्मिन्स
दायुक्तोनित्यंस्यादात्मवान्द्विजः १०८ आचाराद्विच्युतोविप्रोनवेदफलमश्नुते आचारेणतुसंयुक्तःसम्पूर्णफलभा
ग्भवेत् १०९ एवमाचारतोदृष्ट्वाधर्मस्यमुनयोगतिम् सर्वस्यतपसोमूलमाचारंजगृहुःपरम् ११० जगतश्चसमुत्प
त्तिंसंस्कारविधिमेवच व्रतचर्य्योपचारंचस्नानस्यचपरंविधिम् १११ दाराधिगमनंचैवविवाहानांचलक्षणम् म
हायज्ञविधानंचश्राद्धकल्पंचशाश्वतः ११२ वृत्तीनांलक्षणंचैवस्नातकस्यव्रतानिच भक्ष्याभक्ष्यंचशौचंचद्रव्या राम
णांशुद्धिमेवच ११३ स्त्रीधर्म्मयोगंतापस्यंमोक्षंसंन्यासमेवच राज्ञश्चधर्म्ममखिलंकार्य्याणांचविनिर्णयम् ११४ सा ४

(5A)

क्षिप्रप्रश्नविधानञ्च धर्म्मं स्त्रीपुंसयोरपि विभागधर्म्मं द्यूतञ्च कण्टकानाञ्च शोधनम् ११५ वैश्यशूद्रोपचारञ्च संकीर्णानां
च संभवम् आपद्धर्म्मञ्च वर्णानां प्रायश्चित्तविधिन्तथा ११६ संसारगमनञ्चैव त्रिविधं कर्मसंभवम् निःश्रेयसं कर्म्मणा
ञ्च गुणदोषपरीक्षणम् ११७ देशधर्म्मान् जातिधर्म्मान् कुलधर्म्मांश्च शाश्वतान् पाषण्डगणधर्म्मांश्च शास्त्रेऽस्मिन्नु
क्तवान्मनुः ११८ यथेदमुक्तवान्शास्त्रम्पुरा पृष्टो मनुर्मया तथेदं यूयमप्यद्य मत्सकाशान्निबोधत ११९ ॥ इति मानवे
धर्म्मशास्त्रे भृगुप्रोक्तायां संहितायां प्रथमोऽध्यायः ॥ १ ॥ श्रीः ॥ विद्वद्भिस्सेवितस्सद्भिर्नित्यमद्वेषरागिभिः हृदयेनाभ्य
नुज्ञातो यो धर्म्मस्तन्निबोधत १ कामात्मता न प्रशस्ता न चैवेहास्त्यकामता काम्यो हि वेदाऽधिगमः कर्म्मयोगश्च वैदि
कः २ सङ्कल्पमूलः कामो वै यज्ञास्सङ्कल्पसम्भवाः व्रतानि यमधर्म्माश्च सर्वे सङ्कल्पजाः स्मृताः ३ अकामस्य क्रिया का
चिद्दृश्यते नेह कर्हिचित् यद्यद्धि कुरुते किञ्चित्तत्तत्कामस्य चेष्टितम् ४ तेषु सम्यग्वर्त्तमानो गच्छत्यमरलोकताम् य
था संकल्पितांश्चेह सर्वान्कामान् समश्नुते ५ वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम् आचारश्चैव साधूनामा
त्मनस्तुष्टिरेव च ६ यः कश्चित्कस्यचिद्धर्म्मो मनुना परिकीर्त्तितः स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ७ सर्वन्तु समवे
क्ष्येदन्निखिलं ज्ञानचक्षुषा श्रुतिप्रामाण्यतो विद्वान्स्वधर्म्मे निविशेत वै ८ श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ९ श्रुतिस्तु वेदो विज्ञेयो धर्म्मशास्त्रन्तु वै स्मृतिः ते सर्वार्थेष्वमीमांस्ये ताभ्यां

(6)

म० धर्मोहिनिर्बभौ १० योवमन्येततेमूलेहेतुशास्त्राश्रयाद्द्विजः ससाधुभिर्बहिःकार्य्योनास्तिकोवेदनिन्दकः ११ वेदःस्मृति स्मृतिः
५ स्सदाचारःस्वस्यचप्रियमात्मनः एतच्चतुर्विधंप्राहुस्साक्षाद्धर्मस्यलक्षणम् १२ अर्थकामेष्वसक्तानान्धर्मज्ञानंविधीयते ।। १
धर्मंजिज्ञासमानानाम्प्रमाणंपरमंश्रुतिः १३ श्रुतिद्वैधंतुयत्रस्यात्तत्रधर्म्मावुभौस्मृतौ उभावपिहितौधर्म्मौसम्यगुक्तौमनीषि
भिः १४ उदितेनुदितेचैवसमयाध्युषितेतथा सर्वथावर्ततेयज्ञइतीयंवैदिकीश्रुतिः १५ निषेकादिश्मशानान्तोमंत्रैर्यस्योदितो
विधिः तस्यशास्त्रेऽधिकारोऽस्मिन्ज्ञेयोनान्यस्यकस्यचित् १६ सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरम् तंदेवनिर्मितंदेशमा
यावर्त्तंप्रचक्षते १७ तस्मिन्देशेयआचारःपारंपर्यक्रमागतः वर्णानांसान्तरालानांससदाचारउच्यते १८ कुरुक्षेत्रंच
मत्स्यांश्चपाञ्चालाःशूरसेनकाः एषब्रह्मर्षिदेशोवैआर्यावर्तादनन्तरः १९ एतद्देशप्रसूतस्यसकाशादग्रजन्मनः स्वंस्वं
चरित्रंशिक्षेरन्पृथिव्यांसर्वमानवाः २० हिमवद्विन्ध्ययोर्मध्यंयत्प्राग्विनशनादपि प्रत्यगेवप्रयागाच्चमध्यदेशःप्रकीर्तितः
२१ आसमुद्रात्तुवैपूर्वादासमुद्रात्तुपश्चिमात् तयोरेवान्तरंगिर्योरार्यावर्तंविदुर्बुधाः २२ कृष्णसारस्तुचरतिमृगोयत्रस्वभाव
तः सज्ञेयोयज्ञियोदेशोम्लेच्छदेशस्त्वतःपरः २३ एतान्द्विजातयोदेशान्संश्रयेरन्प्रयत्नतः शूद्रस्तुयस्मिन्कस्मिन्वानिवसेद्वृत्ति
कर्षितः २४ एषाधर्मस्यवोयोनिःसमासेनप्रकीर्तिता सम्भवश्चास्यसर्वस्यवर्णधर्मान्निबोधत २५ वैदिकैःकर्मभिःपुण्यै राम
र्निषेकादिर्द्विजन्मनाम् कार्य्यःशरीरसंस्कारःपावनःप्रेत्यचेहच २६ गार्भैर्होमैर्जातकर्म्मचौडमौञ्जीनिबंधनैः बैजिकंगार्भि ५

(6A)

कञ्चैनो द्विजानामपमृज्यते २७ स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः २८ प्राङ्नाभिव
र्द्धनात्पुंसो जातकर्म विधीयते मंत्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् २९ नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत् पुण्ये ति
थौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ३० मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम् वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ३१
शर्म्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम् वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम् ३२ स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनो
हरम् मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ३३ चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् षष्ठेन्नप्राशनं मासि यद्वेष्टं
मङ्गलं कुले ३४ चूडाकर्म्म द्विजातीनां सर्वेषामेव धर्मतः प्रथमेब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ३५ गर्भाष्टमेब्दे कुर्वीत ब्रा
ह्मणस्योपनायनम् गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ३६ ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे राज्ञो बला
र्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ३७ आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते आद्वाविंशात् क्षत्रबंधोराचतुर्विंशतेर्विशः ३८
अत ऊर्द्ध्वं त्रयोप्येते यथाकालमसंस्कृताः सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ३९ नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित्
ब्राह्मान्यौनांश्च संबंधान्नाचरेद्ब्राह्मणैः सह ४० कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः वसीरन्नानुपूर्वेण शाणक्षौमावि
कानि च ४१ मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ४२ मुञ्जाला
भे तु कर्तव्याः कुशाश्मान्तकबल्वजैः त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ४३ कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्ववृतं त्रिवृत् ॥

(७)

म ६

शणसूत्रमयंराज्ञोवैश्यस्याविकसौत्रिकम् ४४ ब्राह्मणोबैल्वपालाशौक्षत्रियोवाटखादिरौ पैलवौदुम्बरौवैश्योदण्डानर्हे। स्मृतिः
न्तिधर्म्मतः ४५ केशान्तिकोब्राह्मणस्यदण्डःकार्य्यःप्रमाणतः ललाटसम्मितोराज्ञःस्यात्तुनासान्तिकोविशः ४६ ऋजवस्तेतु १
सर्वेस्युरव्रणाःसौम्यदर्शनाः अनुद्वेगकरान्नृणांसत्वचोनाग्निदूषिताः ४७ प्रतिगृह्येप्सितन्दण्डमुपस्थायचभास्करम् प्रदक्षि
णम्परीत्याग्निञ्चरेद्भैक्षंयथाविधि ४८ भवत्पूर्व्वञ्चरेद्भैक्षमुपनीतोद्विजोत्तमः भवन्मध्यन्तुराजन्योवैश्यस्तुभवदुत्तरः ४९
मातरम्वास्वसारंवामातुर्व्वाभगिनींनिजाम् भिक्षेतभिक्षांप्रथमंयाचैनंनावमानयेत् ५० समाहृत्यतुतद्भैक्षंयावदर्थममाय
या निवेद्यगुरवेश्नीयादाचम्यप्राङ्मुखःशुचिः ५१ आयुष्यंप्राङ्मुखोभुङ्क्तेयशस्यन्दक्षिणामुखः श्रियंप्रत्यङ्मु।
खोभुङ्क्तेऋतम्भुङ्क्तेह्युदङ्मुखः ५२ उपस्पृश्यद्विजोनित्यमन्नमद्यात्समाहितः भुक्त्वाचोपस्पृशेत्सम्यगद्भिःखानिचसं
स्पृशेत् ५३ पूजयेदशनन्नित्यमद्याच्चैनदकुत्सयन् दृष्ट्वाहृष्येत्प्रसीदेच्चप्रतिनन्देच्चसर्वशः ५४ पूजितंह्यशनंनित्यम्बल
मूर्जञ्चयच्छति अपूजितन्तुतद्भुक्तमुभयंनाशयेदिदम् ५५ नोच्छिष्टङ्कस्यचिद्दद्यान्नाद्याच्चैवतथान्तरा नचैवात्यश
नङ्कुर्य्यान्नचोच्छिष्टःक्वचिद्व्रजेत् ५६ अनारोग्यमनायुष्यमस्वर्ग्यञ्चातिभोजनम् अपुण्यंलोकविद्विष्टंतस्मात्तत्परिवर्ज
येत् ५७ ब्राह्मेणविप्रस्तीर्थेननित्यकालमुपस्पृशेत् कायत्रैदशिकाभ्यांवानपित्र्येणकदाचन ५८ अङ्गुष्ठमूलस्यतलं राम
ब्राह्मन्तीर्थम्प्रचक्षते कायमङ्गुलिमूलेग्रेदेवम्पित्र्यन्तयोरधः ५९ त्रिराचामेदपःपूर्वंद्विःप्रमृज्यात्ततोमुखम् खानिचैव। ६

(7A)

स्पृशेदद्भिरात्मानंशिरएवच ६० अनुष्णाभिरफेनाभिरद्भिस्तीर्थेनधर्मवित् शौचेप्सुस्सर्वदाचामेदेकान्ते प्रागुदङ्मुखः
६१ हृद्गाभिःपूयतेविप्रःकण्ठगाभिस्तुभूमिपः वैश्योद्भिःप्राशिताभिस्तुशूद्रःस्पृष्टाभिरन्ततः ६२ उद्धृतेदक्षिणेपाणा
वुपवीत्युच्यतेद्विजः सव्येप्राचीनआवीतीनिवीतीकण्ठसज्जने ६३ मेखलामजिनंदण्डमुपवीतंकमण्डलुम् अप्सुप्रा
स्यविनष्टानिगृह्णीतान्यानिमंत्रवत् ६४ केशान्तःषोडशेवर्षेब्राह्मणस्यविधीयते राजन्यबंधोर्द्वाविंशेवैश्यस्यद्व्यधिकेततः॥
६५ अमंत्रिकातुकार्येयंस्त्रीणामावृदशेषतः संस्कारार्थंशरीरस्ययथाकालंयथाक्रमम् ६६ वैवाहिकोविधिःस्त्रीणांसं
स्कारोवैदिकःस्मृतः पतिसेवागुरौवासोगृहार्थोऽग्निपरिक्रिया ६७ एषप्रोक्तोद्विजातीनामौपनायनिकोविधिः उत्पत्ति
व्यञ्जकःपुण्यःकर्मयोगंनिबोधत ६८ उपनीयगुरुःशिष्यंशिक्षयेच्छौचमादितः आचारमग्निकार्यंचसंध्योपासनमे
वच ६९ अध्येष्यमाणस्त्वाचान्तोयथाशास्त्रमुदङ्मुखः ब्रह्माञ्जलिकृतोध्याप्योलघुवासाजितेन्द्रियः ७० ब्रह्मारम्भेव
सानेचपादौग्राह्यौगुरोस्सदा संहत्यहस्तावध्येयंसहिब्रह्माञ्जलिःस्मृतः ७१ व्यत्यस्तपाणिनाकार्यमुपसंग्रहणंगुरोः सव्येन
सव्यःस्पृष्टव्योदक्षिणेनचदक्षिणः ७२ अध्येष्यमाणंतुगुरुर्नित्यकालमतन्द्रितः अधीष्वभोइतिब्रूयाद्विरामोस्त्वितिचारमेत्
७३ ब्राह्मणःप्रणवंकुर्यादादावन्तेचसर्वदा स्रवत्यनोङ्कृतंपूर्वंपरस्ताच्चविशीर्यति ७४ प्राक्कूलान्पर्युपासीनःपवित्रैश्चै
वपावितः प्राणायामैस्त्रिभिःपूतस्ततओंकारमर्हति ७५ अकारंचाप्युकारंचमकारंचप्रजापतिः वेदत्रयान्निरदुहद्भूर्भु

(8)

म॰ ७ वः स्वरितीतिच ७६ त्रिभ्य एवतुवेदेभ्यः पादम्पादमदूदुहत् तदित्यृचोस्याः सावित्र्याः परमेष्ठी प्रजापतिः ७७ एतदक्षरमेतां स्मृतिः
च्चजपन्व्याहृतिपूर्विकाम् संध्ययोर्वेदविद्विप्रोवेदपुण्येनयुज्यते ७८ सहस्रकृत्वस्त्वभ्यस्यबहिरेतत्त्रिकंद्विजः महतोप्येन १
सोमासात्त्वचेवाहिर्विमुच्यते ७९ एतयर्चाविसंयुक्तः कालेचक्रिययास्वया ब्रह्मक्षत्रियविड्योनिर्गर्हणांयातिसाधुषु ८०
ओंकारपूर्विकास्तिस्रोमहाव्याहृतयोऽव्ययाः त्रिपदाचैवसावित्रीविज्ञेयम्ब्रह्म णोमुखम् ८१ योधीतेऽहन्यहन्येतांत्री।
णिवर्षाण्यतन्द्रितः सब्रह्मपरमभ्येतिवायुभूतः खमूर्तिमान् ८२ एकाक्षरम्परंब्रह्मप्राणायामाःपरन्तपः सावित्र्यास्तुपरंना
स्तिमौनात्सत्यंविशिष्यते ८३ क्षरन्तिसर्वावैदिक्योजुहोतियजतिक्रियाः अक्षरंदुष्करंज्ञेयम्ब्रह्मचैवप्रजापतिः ८४॥
विधियज्ञाज्जपयज्ञोविशिष्टोदशभिर्गुणैः उपांशुःस्याच्छतगुणःसाहस्रोमानसःस्मृतः ८५ येपाकयज्ञाश्चत्वारोविधियज्ञ
समन्विताः सर्वेतेजपयज्ञस्यकलांनार्हन्तिषोडशीम् ८६ जप्येनैवतुसंसिध्येद्ब्राह्मणोनात्रसंशयः कुर्यादन्यन्नवाकु।
र्यान्मैत्रोब्राह्मणउच्यते ८७ इन्द्रियाणांविचरतांविषयेष्वपहारिषुसंयमेयत्नमातिष्ठेद्विद्वान्यन्तेववाजिनाम् ८८ ए
कादशेन्द्रियाण्याहुर्यानिपूर्वेमनीषिणः तानिसम्यक्प्रवक्ष्यामियथावदनुपूर्वशः ८९ श्रोत्रन्त्वक्चक्षुषीजिह्वानासिका
चैवपञ्चमी पायूपस्थंहस्तपादंवाक्चैवदशमीस्मृता ९० बुद्धीन्द्रियाणिपञ्चैषांश्रोत्रादीन्यनुपूर्वशः कर्मेन्द्रियाणिप राम
ञ्चैषांपाय्वादीनिप्रचक्षते ९१ एकादशंमनोज्ञेयंस्वगुणेनोभयात्मकम् यस्मिन्जितेजितावेतौभवतःपञ्चकौगणौ ९२ ७

(8A)

इन्द्रियाणाम्प्रसङ्गेनदोषमृच्छत्यसंशयम् सन्नियम्यतुतान्येवततःसिद्धिन्नियच्छति ९३ नजातुकामःकामानामुप
भोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते ९४ यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत् प्रापणा
त्सर्वकामानांपरित्यागोविशिष्यते ९५ नतथैतानिशक्यन्तेसन्नियन्तुमसेवया विषयेषुप्रजुष्टानियथाज्ञानेननित्यशः
९६ वेदास्त्यागश्चयज्ञाश्चनियमाश्चतपांसिच नविप्रभावदुष्टस्यसिद्धिङ्गच्छन्तिकर्हिचित् ९७ श्रुत्वास्पृष्ट्वाचदृष्ट्वाचभुक्त्वा
घ्रात्वाचयोनरः नहृष्यतिग्लायतिवासविज्ञेयोजितेन्द्रियः ९८ इन्द्रियाणान्तुसर्वेषांयद्येकंक्षरतीन्द्रियम् तेनास्यक्षरति
प्रज्ञादृतेःपात्रादिवोदकम् ९९ वशेकृत्वेन्द्रियग्रामंसंयम्यचमनस्तथा सर्वान्संसाधयेदर्थानक्षिण्वन्योगतस्तनुम्
१०० पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् पश्चिमांतुसमासीनःसम्यगृक्षविभावनात् १०१ पूर्वांसंध्यांजपंस्तिष्ठन्नै
शमेनोव्यपोहति पश्चिमांतुसमासीनोमलंहंतिदिवाकृतम् १०२ नतिष्ठतितुयःपूर्वांनोपास्तेयश्चपश्चिमाम् सशूद्रवद्ब
हिष्कार्य्यःसर्वस्माद्द्विजकर्म्मणः १०३ अपांसमीपेनियतोनैत्यकंविधिमास्थितः सावित्रीमप्यधीयीतगत्वारण्यंसमाहि
तः १०४ वेदोपकरणेचैवस्वाध्यायेचैवनैत्यके नानुरोधोस्त्यनध्यायेहोममंत्रेषुचैवहि १०५ नैत्यकेनास्त्यनध्यायोब्रह्म
सत्रंहितत्स्मृतम् ब्रह्माहुतिहुतम्पुण्यमनध्यायवषट्कृतम् १०६ यःस्वाध्यायमधीतेब्दंविधिनानियतःशुचिः तस्यनि
त्यंक्षरत्येषपयोदधिघृतंमधु १०७ अग्नीन्धनम्भैक्षचर्य्यामधःशय्यांगुरोर्हितम् आसमावर्त्तनात्कुर्य्यात्कृतोपनयनोद्वि

(९)

म० जः १०८ आचार्य्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्म्मतः १०९ नापृष्टः कस्यचि स्मृतिः
८ द्ब्रूयान्नचान्यायेन पृच्छतः जानन्नपि हि मेधावी जडवल्लोक आचरेत् ११० अधर्म्मेण च यः प्राह यश्चाधर्म्मेण पृच्छति तयोर १
न्यतरः प्रैति विद्वेषं चाधिगच्छति १११ धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ११२
विद्ययैव समं कामं मर्त्तव्यं ब्रह्मवादिना आपद्यपि हि घोरायां नत्वेनामिरिणे वपेत् ११३ विद्या ब्राह्मणमेत्याह शेवधिस्ते ।
स्मि रक्ष माम् असूयकाय मां मादास्तथा स्यां वीर्य्यवत्तमा ११४ यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणम् तस्मै मा ब्रूहि
विप्राय निधिपायाप्रमादिने ११५ ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात् स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ११६ ॥
लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ११७ सावित्रीमात्रसारोपि वरं विप्रः
सुयंत्रितः नायंत्रितस्त्रिवेदोपि सर्वाशी सर्वविक्रयी ११८ शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् शय्यासनस्थ
श्चैवैनं प्रत्युत्थायाभिवादयेत् ११९ ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रति
पद्यते १२० अभिवादनशीलस्य नित्यं वृद्धोपसेविनः चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशो बलम् १२१ अभिवादात्परं
विप्रो ज्यायांसमभिवादयन् असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् १२२ नामधेयस्य ये केचिदभिवादं न जानते राम
नान्प्राज्ञोहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च १२३ भोः शब्दं कीर्तयेदन्ते स्वस्य नाम्नोभिवादने नाम्नां स्वरूपभावो हि ८

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(9A)

भोभावऋषिभिःस्मृतः १२४ आयुष्मान्भवसौम्येतिवाच्योविप्रोभिवादने अकारश्चास्यनाम्नोंतेवाच्यःपूर्वाक्षरःप्लुतः १२५
योनवेत्त्यभिवादस्यविप्रःप्रत्यभिवादनम् नाभिवाद्यःसविदुषायथाशूद्रस्तथैवसः १२६ ब्राह्मणंकुशलंपृच्छेत्क्षत्रबन्धु
मनामयम् वैश्यंक्षेमंसमागम्यशूद्रमारोग्यमेवच १२७ अवाच्योदीक्षितोनाम्नायवीयानपियोभवेत् भोभवत्पूर्वकन्त्वेन
मभिभाषेतधर्म्मवित् १२८ परपत्नीतुयास्त्रीस्यादसम्बन्धाचयोनितः तांब्रूयाद्भवतीत्येवंसुभगेभगिनीतिच १२९ मातु
लांश्चपितृव्यांश्चश्वशुरानृत्विजोगुरून् असावहमितिब्रूयात्प्रत्युत्थाययवीयसः १३० मातृष्वसामातुलानीश्वश्रूरथपि
तृष्वसा सम्पूज्यागुरुपत्नीवत्समास्तागुरुभार्य्यया १३१ भ्रातुर्भार्य्योपसंग्राह्यासवर्णाहन्यहन्यपि विप्रोष्यतूपसंग्राह्याज्ञा
तिसम्बन्धियोषितः १३२ पितुर्भगिन्यांमातुश्चज्यायस्यांचस्वस्र्य्यपि मातृवद्वृत्तिमातिष्ठेन्मातानाभ्योगरीयसी १३३
दशाब्दाख्यंपौरसख्यंपञ्चाब्दाख्यंकलाभृताम् त्र्यब्दपूर्वंश्रोत्रियाणांस्वल्पेनापिस्वयोनिषु १३४ ब्राह्मणन्दशवर्षन्तुश
तवर्षन्तुभूमिपम् पितापुत्रौविजानीयाद्ब्राह्मणस्तुतयोःपिता १३५ वित्तंबन्धुर्वयःकर्म्मविद्याभवतिपञ्चमी एतानिमान्य
स्थानानिगरीयोयद्यदुत्तरम् १३६ पञ्चानां त्रिषुवर्णेषुभूयांसिगुणवन्तिच यत्रस्युःसोत्रमानार्हःशूद्रोपिदशमीङ्गतः
१३७ चक्रिणोदशमीस्थस्यरोगिणोभारिणःस्त्रियाः स्नातकस्यचराज्ञश्चपन्थादेयोवरस्यच १३८ तेषान्तुसमवेता
नांमान्यौस्नातकपार्थिवौ राजस्नातकयोश्चैवस्नातकोनृपमानभाक् १३९ उपनीयतुयःशिष्यंवेदमध्यापयेद्द्विजः सक॥

म० ९

ल्पंसरहस्यञ्चतमाचार्य्यम्प्रचक्षते १४० एकदेशन्तुवेदस्यवेदाङ्गान्यपिवापुनः योध्यापयतिवृत्त्यर्थमुपाध्यायःसउच्यते स्मृतिः
१४१ निषेकादीनिकर्म्माणियःकरोतियथाविधि सम्भावयतिचान्नेनसोविप्रोगुरुरुच्यते १४२ अग्न्याधेयम्पाकयज्ञान १
ग्निष्टोमादिकान्मखान् यःकरोतिवृतोयस्यसतस्यर्त्विगिहोच्यते १४३ यआवृणोत्यवितथंव्रह्मणाश्रवणावुभौ समा
तासपितातेयमातन्नद्रुह्येत्कदाचन १४४ उपाध्यायान्दशाचार्य्य आचार्य्याणांशतंपिता सहस्रन्तुपितॄन्मातागौरवे
णातिरिच्यते १४५ उत्पादकव्रह्मदात्रोर्गरीयान्व्रह्मदःपिता व्रह्मजन्महिविप्रस्यप्रेत्यचेहचशाश्वतम् १४६ कामा
न्मातापिताचैनंयदुत्पादयतोमिथः संभूतिंतस्यतांविद्याद्यद्योनावभिजायते १४७ आचार्य्यस्त्वस्ययांजातिंविधिव
द्वेदपारगः उत्पादयतिसावित्र्यासासत्यासाजरामरा १४८ अल्पंवावहुवायस्यश्रुतस्योपकरोतियः तमपीहगुरुं
विद्याच्छ्रुतोपक्रिययातया १४९ व्राह्मस्यजन्मनःकर्त्तास्वधर्मस्यचशासिता वालोपिविप्रोवृद्धस्यपिताभवतिधर्म्म
तः १५० अध्यापयामासपितॄन्शिशुराङ्गिरसःकविः पुत्रकाइतिहोवाचज्ञानेनपरिगृह्यतान् १५१ तेतमर्थमपृच्छन्तदे
वानागतमन्यवः देवाश्चैतान्समेत्योचुर्न्याय्यम्वःशिशुरुक्तवान् १५२ अज्ञोभवतिवैवालःपिताभवतिमंत्रदः अज्ञंहिवाल
मित्याहुःपितेत्येवतुमन्त्रदम् १५३ नहायनैर्नपलितैर्नवित्तेननवंधुभिः ऋषयश्चक्रिरेधर्म्मंयोनूचानःसनोमहान् १५४ स्म
विप्राणांज्ञानतोज्यैष्ठ्यंक्षत्रियाणान्तुवीर्य्यतः वैश्यानांधान्यधनतःशूद्राणामेवजन्मतः १५५ नतेनवृद्धोभवतियेनास्य ९

(10A)

पलितंशिरः योवैयुवाप्यधीयानस्तन्देवाःस्थविरंविदुः १५६ यथाकाष्ठमयोहस्तीयथाचर्ममयोमृगः यश्चविप्रोनधीया
नस्त्रयस्तेनामबिभ्रति १५७ यथाषंढोफलःस्त्रीषुयथागौर्गविचाफला यथाचाज्ञेफलंदानंतथाविप्रोनृचोफलः १५८
अहिंसयैवभूतानांकार्य्यंश्रेयोनुशासनम् वाक्चैवमधुराश्लक्ष्णाप्रयोज्याधर्ममिच्छता १५९ यस्यवाङ्मनसीशुद्धेस
म्यग्गुप्तेचसर्वदा सवैसर्वमवाप्नोतिवेदान्तोपगतंफलम् १६० नारुन्तुदःस्यादार्तोपिनपरद्रोहकर्म्मधीः ययास्योद्वि
जतेवाचानालोक्यान्तामुदीरयेत् १६१ सम्मानाद्ब्राह्मणोनित्यमुद्विजेतविषादिव अमृतस्येवचाकांक्षेदवमानस्यस
र्वदा १६२ सुखंह्यवमतःशेतेसुखंचप्रतिबुध्यते सुखंचरतिलोकेस्मिन्नवमंताविनश्यति १६३ अनेनक्रमयोगेन
संस्कृतात्माद्विजःशनैः गुरौवसन्सञ्चिनुयाद्ब्रह्माधिगमिकंतपः १६४ तपोविशेषैर्विविधैर्व्रतैश्चविधिचोदितैः वेदःकृ
त्स्नोधिगन्तव्यःसरहस्योद्विजन्मना १६५ वेदमेवसदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः वेदाभ्यासोहिविप्रस्यतपःपरमि
होच्यते १६६ आहैवसनखाग्रेभ्यःपरमन्तप्यतेतपः यःस्रग्व्यपिद्विजोधीतेस्वाध्यायंशक्तितोन्वहम् १६७ योन
धीत्यद्विजोवेदमन्यत्रकुरुतेश्रमम् सजीवन्नेवशूद्रत्वमाशुगच्छतिसान्वयः १६८ मातुरग्रेधिजननंद्वितीयंमौं
ञ्जिबंधने तृतीयंयज्ञदीक्षायांद्विजस्यश्रुतिचोदनात् १६९ तत्रयद्ब्रह्मजन्मास्यमौंजीबंधनचिह्नितम् तत्रास्यमाता
सावित्रीपितात्वाचार्यउच्यते १७० वेदप्रदानादाचार्य्यंपितरंपरिचक्षते नह्यस्मिन्युज्यतेकर्म्मकिंचिदामौंञ्जिबंध

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com